# 3 प्रहेलिका:

एकचक्षुर्न काकोऽयं बिलमिच्छन्न पन्नगः।
क्षीयते वर्धते चैव न समुद्रो न चन्द्रमाः॥ १॥
चतुर्मुखो न च ब्रह्मा वृषारूढो न शङ्करः।
निर्जीवी च निराहारी अजस्रं धान्यभक्षणम्॥ २॥
अपदो दूरगामी च साक्षरो न च पण्डितः।
अमुखः स्फुटवक्ता च यो जानाति स पण्डितः॥ ३॥
पर्वताग्रे रथो याति भूमौ तिष्ठति सारथिः।
चलति वायुवेगेन पदमेकं न गच्छति॥ ४॥
सुवर्णस्य सुवर्णस्य सुवर्णस्य च जानकि।
प्रेषिता तव रामेण सुवर्णस्य च मुद्रिका॥ ५॥
भोजनान्ते च किं पेयं जयन्तः कस्य वै सुतः।
कथं विष्णुपदं प्रोक्तं तक्रं शक्रस्य दुर्लभम्॥ ६॥

## Glossary

**चक्षुः** eye **काकः** crow **बिलम्** hole **पन्नगः** snake **क्षीयते** is being destroyed **वर्धते** increases **चतुर्मुखः** having four-faced **अजस्रम्** constant **वृषः** ox **तिष्ठति** is standing **मुद्रिका** ring **पेयम्** can be drunk **सुतः** son **प्रोक्तम्** said **अपदः** without legs **तक्रम्** butter milk **शक्रः** Indra **याति** goes/is going

## Sandhi

**चक्षुर्न - चक्षुः न, कोकोऽयम् - काकः अयम्, बिलमिच्छन्न - बिलम् इच्छन् न, चैव - च एव, समुद्रो न - समुद्रः न**

## Exercise

**1. Pronounce the following words correctly :**

(1) काकोऽयम् (2) पन्नगः (3) अजस्रम् (4) स्फुटवक्ता (5) पर्वताग्रे (6) भोजनान्ते



Get More Learning Materials Here : CLICK HERE www.studentbro.in

## 2. Answer the following questions :

(1) एकचक्षुः कः अस्ति ?

(2) कः धान्यभक्षणं करोति ?

(3) सारथिः कुत्र तिष्ठति ?

(4) रथः कुत्र याति ?

(5) रामेण का प्रेषिता ?

(6) जयन्तः कस्य पुत्रः ?

## 3. Fill in the blanks selecting appropriate word from the brackets :

(1) चतुर्मुखः ______________ अस्ति। (ब्रह्मा, विष्णुः, शङ्करः)

(2) भोजनान्ते पेयम् ______________ । (दुग्धम्, सुपम्, तक्रम्)

(3) अपदः शब्दस्य अर्थः ______________ । (सपादः, पादरहितः, पादः)

(4) रथः ______________ चलति। (वायुवेगेन, जलवेगेन, विद्युत्वेगेन)

(5) विष्णुपदं ______________ प्रोक्तम्। (सुलभम्, उन्नतम्, दुर्लभम्)

## 4. Write the following shlokas in good handwriting :

(1) भोजनान्ते ______________________________ दुर्लभम्॥

(2) अपदो दूरगामी ______________________________ पण्डितः॥

## 5. Translate the following English words into Sanskrit :

(1) after dinner (2) without mouth (3) one step (4) ring (5) one who is going away
(6) one who rides a bullock



Get More Learning Materials Here : CLICK HERE www.studentbro.in

6. **Here are some conjuncts/compounds used in the unit. Form other words like them :**

(1) From वृष–वृषारुढः। In the same way -

अश्व ____________ गज ____________ वृक्ष ____________

(2) From पदम्–पदमेकम्। In the same way -

शब्दम् ____________ वाक्यम् ____________ गीतम् ____________

(3) From भोजन–भोजनान्ते। In the same way -

दिन ____________ निशा ____________ वर्षा ____________

(4) From पर्वत:–पर्वताग्रे। In the same way -

रथ ____________ वृक्ष ____________ कर ____________

**Activity :**

- Find out a few prahelikas spoken in your native and write them.
- Get the good slogans/thoughts helping us to be healthy and make a collection.

Illustration : (1) अजीर्णे भोजनं विषम्।

(2) आँखे त्रिफला, दांते लूण। पेट न भरीए चारे खूण।।



Get More Learning Materials Here : CLICK HERE www.studentbro.in